# shrI hariharaputrAShTottarashatanAma stotraM

# શ્રીહરિહરપુત્રાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : hariharaputraaSTottarashatanaama stotraM 1

File name : hariharaputra108stotra.itx

Category : aShTottarashatanAma, deities_misc, ayyappa, stotra

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Description-comments : See corresponding nAmAvalI

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

shrI hariharaputrAShTottarashatanAma stotraM

# શ્રીહરિહરપુત્રાષ્ટોત્તરશતનામસ્તોત્રમ્

અસ્ય શ્રીહરિહરપુત્રાષ્ટોત્તરશતનામસ્તોત્રસ્ય બ્રહ્મા ઋષિઃ । અનુષ્ટુપ્ છન્દઃ ।
શ્રીહરિહરપુત્રો દેવતા । હ્રીં બીજમ્ ।શ્રીં શક્તિઃ । ક્લીં કીલકમ્ ।
શ્રીહરિહરપુત્રપ્રીત્યર્થે જપે વિનિયોગઃ ॥

હ્રીં ઇત્યાદિભિઃ ષડઙ્ગન્યાસઃ ॥

ધ્યાનમ્ ॥

ત્રિગુણિતમણિપદ્મં વજ્રમાણિક્યદણ્ડં
   સિતસુમશરપાશમિક્ષુકોદણ્ડકાણ્ડમ્ ।
??ધૃતમધુપાત્રં બિભ્રતં હસ્તપદ્મૈઃ
   હરિહરસુતમીડે ચક્રમન્ત્રાત્મમૂર્તિમ્ ॥

ૐ । મહાશાસ્તા વિશ્વશાસ્તા લોકશાસ્તા તથૈવ ચ ।
ધર્મશાસ્તા વેદશાસ્તા કાલશસ્તા ગજાધિપઃ ॥ ૧॥

ગજારૂઢો ગણાધ્યક્ષો વ્યાઘ્રારૂઢો મહદ્યુતિઃ ।
ગોપ્તાગીર્વાણસંસેવ્યો ગતાતઙ્કો ગણાગ્રણીઃ ॥ ૨॥

ઋગ્વેદરૂપો નક્ષત્રં ચન્દ્રરૂપો બલાહકઃ ।
દૂર્વાશ્યામો મહારૂપઃ ક્રૂરદૃષ્ટિરનામયઃ ॥ ૩॥

ત્રિનેત્ર ઉત્પલકરઃ કાલહન્તા નરાધિપઃ ।
ખણ્ડેન્દુમૌળિતનયઃ કલ્હારકુસુમપ્રિયઃ ॥ ૪॥

મદનો માધવસુતો મન્દારકુસુમર્ચિતઃ ।
મહાબલો મહોત્સાહો મહાપાપવિનાશનઃ ॥ ૫॥

મહાશૂરો મહાધીરો મહાસર્પવિભૂષણઃ ।
અસિહસ્તઃ શરધરો હાલાહલધરાત્મજઃ ॥ ૬॥

અર્જુનેશોઽગ્નિનયનશ્ચાનઙ્ગમદનાતુરઃ ।

દુષ્ટગ્રહાધિપઃ શ્રીદઃ શિષ્ટરક્ષણદીક્ષિતઃ ॥ ૭॥

કસ્તૂરીતિલકો રાજશેખરો રાજસત્તમઃ ।
રાજરાજાર્ચિતો વિષ્ણુપુત્રો વનજનાધિપઃ ॥ ૮॥

વર્ચસ્કરોવરરુચિર્વરદો  વાયુવાહનઃ ।
વજ્રકાયઃ ખડ્ગપાણિર્વજ્રહસ્તો બલોદ્ધતઃ ॥ ૯॥

ત્રિલોકજ્ઞશ્ચાતિબલઃ પુષ્કલો વૃત્તપાવનઃ ।
પૂર્ણાધવઃ પુષ્કલેશઃ પાશહસ્તો ભયાપહઃ ॥ ૧૦॥

ફટ્કારરૂપઃ પાપઘ્નઃ પાષણ્ડરુધિરાશનઃ ।
પઞ્ચપાણ્ડવસન્ત્રાતા પરપઞ્ચાક્ષરાશ્રિતઃ ॥ ૧૧॥

પઞ્ચવક્ત્રસુતઃ પૂજ્યઃ પણ્ડિતઃ પરમેશ્વરઃ ।
ભવતાપપ્રશમનો ભક્તાભીષ્ટપ્રદાયકઃ ॥ ૧૨॥

કવિઃ કવીનામધિપઃ કૃપાળુઃ ક્લેશનાશનઃ ।
સમોઽરૂપશ્ચ સેનાનિર્ભક્તસમ્પત્પ્રદાયકઃ ॥ ૧૩॥

વ્યાઘ્રચર્મધરઃ શૂલી કપાલી વેણુવાદનઃ ।
કમ્બુકણ્ઠઃ કલરવઃ કિરીટાદિવિભૂષણઃ ॥ ૧૪॥

ધૂર્જટિર્વીરનિલયો વીરો વીરેન્દુવન્દિતઃ ।
વિશ્વરૂપો વૃષપતિર્વિવિધાર્થફલપ્રદઃ ॥ ૧૫॥

દીર્ઘનાસો મહાબાહુશ્ચતુર્બાહુર્જટાધરઃ ।
સનકાદિમુનિશ્રેષ્ઠસ્તુત્યો હરિહરાત્મજઃ ॥ ૧૬॥

ઇતિ શ્રી હરિહરપુત્રાષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*shrI hariharaputrAShTottarashatanAma stotraM*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*